# संस्कृतवार्ता:

दिनाङ्क : 27/09/2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य ओडिशायाः झारसुगुड़ातः षष्टिसहस्रकोट्यधिकरूप्यकाणां नैकासां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च अकरोत् । तेनोक्तं यत् भारतं दूरसञ्चार प्रौद्योगिक्याः वैश्विकं केन्द्रं भवितुम् अग्रसरम् अस्ति ।
- प्रधानमन्त्रिणा सूरतस्य उधना इत्यस्य ओडिशायाः च ब्रहमपुरस्य मध्ये सञ्चाल्यमानाय गुजरातस्य प्रथमामृत-भारत-एक्सप्रेस रेलयानाय अपि वर्चुअल इति प्रातिभाषिक-माध्यमेन हरितध्वजः प्रदर्शितः।
- भारतेन उक्तं यत् पाकिस्तानम् आतङ्कवादस्य महिमामण्डनं करोति, अथ च भारत-पाकिस्तानयोः सङ्घर्षस्य तथ्यान् यथामतिं प्रस्तौति।
- ऋतु-विभागेन पश्चिम-दक्षिण-भारते ओडिशायाः च नैकेषु भागेषु अद्य अत्यधिक-वर्षायाः सञ्चेतना प्रदत्ता।
- दक्षिणकोरियायाः ग्वांगजू नगरे विश्व पैरा आर्चरी इति शरसन्ध-स्पर्धायां भारतेन एकलवर्गे द्वे स्वर्णपदके विजिते।

---

प्रधानमन्त्री-ओडिशा

प्रधानमन्त्री नरेन्द्रमोदी अद्य ओडिशायाः झारसुगुड़ातः षष्टि-सहस्र-कोट्यधिक-रूप्यकाणां नैकासां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च अकरोत् । तेनोक्तं यत् भारतं दूरसञ्चार प्रौद्योगिक्याः वैश्विकं केन्द्रं भवितुम् अग्रसरम् अस्ति । एताः परियोजनाः दूरसंचार-रेलवे उच्च-शिक्षा स्वास्थ्यसेवा कौशल-विकास ग्रामीण आवासं च समेत्य विविधक्षेत्रैः सह सम्बद्धाः सन्ति। श्रीमोदिना सूरतस्य उधना इत्यस्य ओडिशायाः च ब्रहमपुरस्य मध्ये सञ्चाल्यमानाय गुजरातस्य प्रथमामृत-भारत-एक्सप्रेस रेलयानाय अपि वर्चुअल इति प्रातिभाषिक-माध्यमेन हरितध्वजः

प्रदर्शितः। अत्रावसरे ओडिशायाः राज्यपालः हरि-बाबू कम्भमपतिः मुख्यमन्त्री मोहनचरण माझी अन्य-गणमान्यजनाः उपस्थिताः आसन् । अस्मिन् अवसरे केन्द्रीय-रेल-मन्त्री अश्विनी-वैष्णवः केन्द्रीयो जल-शक्तिः मन्त्री सी. आर. पाटिलः च उधना रेलवे स्थासने उपस्थितौ अवर्तताम्। प्रधानमंत्री जनसभां संबोधयन् अवोचत् यत् केन्द्र-प्रशासनेन सद्य एव राज्ये द्वयोः सेमीकंडक्टर संयन्त्रयोः स्थापनायै अनुमतिः प्रदत्ता। अयं ओडिशायाः औद्योगिक-प्रौद्योगिकविकासम् उन्नेतुं महत्वपूर्ण-पदक्षेपः अस्ति।

श्रीमोदिनोक्तं यत् अस्य शताब्दस्य सप्तदशे वर्षे वस्तुसेवाकर-प्रवर्तनस्य अनन्तरम् आपीडे न्यूनता जाता, येन नागरिकेषु वित्तीयापीडः न्यूनताङ्गतः। प्रधानमन्त्रिणा बीएसएनएल द्वारा स्थापितानां सार्धसप्तनवति-सहस्राधिकानां 4जी मोबाइल टावर इत्येषाम् अपि शुभारम्भो विहितः। तेनोक्तं यत् भारतं दूरसञ्चार प्रौद्योगिक्याः वैश्विकं केन्द्रं भवितुम् अग्रसरम् अस्ति ।

प्रधानमन्त्रिणा बरहामपुरस्थितम् एमकेसीजी चिकित्सा-महाविदयालयम् अथ बुर्ला-संबलपुर स्थितं वीआईएमएसएआर इत्येनं च विश्वस्तरीय-चिकित्सालयत्वेच परिवर्तितुं योजना अपि उद्घोषिता।

---------------------------------------------

<u>भारतं प्रत्युत्तरम्</u>

भारतेनोक्तं यत् पाकिस्तानम् आतंकवादस्य महिमामण्डनं करोति अथ च भारत-पाकिस्तान-सङ्घर्षस्य तथ्यान् यथामतिं परिवर्त्य प्रस्तौति। पाकिस्तानस्य प्रधानमन्त्रिणः शहबाज शरीफस्य सम्बोधनस्य अनन्तरं संयुक्त राष्ट्र भारतस्य स्थायी मिशन इत्यस्य प्रथमसचिवेन पेटल-गहलोतेन भारते आतङ्कवादी आक्रमणेभ्यः पाकिस्तानम् उत्तरदायि प्रतिपादितम्। अनया भारतस्य आत्मरक्षायाः अधिकारः सबलं प्रतिपादितः। प्रथम-सचिवेन उक्तं यत् आतङ्कवादः पाकिस्तानस्य विदेशनीतेः केन्द्रम् अस्ति।

---------------------------------------------

<u>फिलिस्तीन</u>

भारते-फिलिस्तीन-राष्ट्रस्य राजदूत: अब्दुल्ला-अबू-शावेश: नरेन्द्रमोदी-प्रशासनस्य प्रशंसा अकरोत्। यतोऽहि मोदीवर्यस्य प्रशासनं फिलिस्तीन-वासिनां समर्थनं अकरोत्। तेन प्रोक्तम् यत्

भारतदेश: .फिलिस्तीन-देशे कोटि-डॉलर-व्ययेन एकस्यां चिकित्सालय-परियोजनायां कार्यं करोति। स: एतदपि प्रोक्तवान् यत् भारतस्य विदेशमंत्रालय: .फिलिस्तीन-देशार्थम् अहोरात्रम् उपलब्धो वर्तते।

---------------------------------------------

## पञ्जाबे प्रत्यर्पणसाफल्यम्

पञ्जाब आरक्षिबलेन केन्द्रीयाभिकरणैः सह बब्बर खालसा अन्ताराष्ट्रिय-गुल्मस्य आतङ्कवादी परमिंदर सिंह पिंडी इत्यमुम् अबू धाबीतः भारते प्रत्यर्पितुं सफलता प्राप्ता। आरक्षि- सूत्राणाम् अनुसारं पिंडी द्वयोः वैदेशिकातङ्कवादिनोः सहयोगी वर्तते। असौ नैकेषु जघन्यापराधेषु सम्मिलितः अवर्तत। आरक्षिबलस्य अनुरोधे विदेश-मन्त्रालयस्य संयुक्त अरब अमीरातस्य च अधिकारिभिः सह समन्वयं विधाय आरोपिणः प्रत्यर्पणे सफलता प्राप्ता।

---------------------------------------------

## ऋतु विभाग:

ऋतु विज्ञान विभागेन अद्य छत्तीसगढ़े केरले महियां कोङ्कणे गोवायाम् ओडिशायां महाराष्ट्रे उत्तर कर्णाटके तेलङ्गनायां च प्रबल वृष्टे: नारङ्गवर्णीया सञ्चेतना प्रसारिता। अत्रान्तरे उत्तर-पश्चिम प्रावृट् कारणेन बङ्गल जात्याम् आपीड कारणेन च ओडिशाया: विविधभागेषु अत्यधिक वर्षाया: सम्भावना वर्तते।

---------------------------------------------

## पैरा-एथलेटिक्स

द्वादशी-विश्व-पैरा-एथलेटिक्स-चैंपियनशिप-इतिप्रतिस्पर्धा अद्य नवदिल्ल्या: जवाहर-लाल-नेहरू-क्रीडांगणे आराब्धा। इयम् प्रतिस्पर्धा नव-दिवस-पर्यन्तं भविष्यति। अस्यां प्रतियोगितायां षड्अशीत्याधिक शतम् प्रतिस्पर्धा: भविष्यन्ति। पुरूष वर्गाणं कृते एकधिकैकशतम् महिलानां कृते चतु:अशीति: प्रतिस्पर्धा: भविष्यन्ति। एका मिश्रित-स्पर्धा अपि भविस्यति।

।। इति वार्ता: ।।